योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १०४

वाल्मीकिः

चतुरधिकशततमः सर्गः १०४

श्रीवसिष्ठ उवाच ।

आकाशः शब्दतन्मात्रं स्पर्शतन्मात्रकोऽनिलः ।

तत्सङ्गोत्कर्षजं तेजस्तच्छान्तिश्चेत्यपां स्थितिः ।। १

भूरेषां सङ्घः स्वप्राभे जगद्भाने क्रमस्त्विति ।

कथं नाम किलामूर्ताद्व्योम्नो मूर्तिः प्रवर्तते ।। २

गत्वा सुदूरमप्येतज्ज्ञप्तेश्चेत्परिकल्प्यते ।

तदादावेव सत्यर्थे दोषोऽस्मिन्क इवामले ।। ३

ज्ञप्तिरेवातिविमला स्वरूपात्मनि भाति यत् ।

तदेव जगदित्युक्तं सत्यमित्येव सत्यतः ।। ४

न क्वचित्सन्ति भूतानि पञ्च कुट्यादयो न वा ।

असन्त्यप्यनुभूतानि ननु स्वप्नदशास्विव ।। ५

स्वभाव एव विमलो यथा स्वप्ने पुरादिवत् ।

कचत्येवं जाग्रतीदं जगद्वद्वस्तुतस्तु खम् ।। ६

चेतनाकाश एवाहं तदेवेदं जगत्स्थितम् ।

इत्यहं जगदित्येकं खमेवैकं शिलाघनम् ।। ७

यदादिसर्गजननं यत्कल्पान्तविवर्तनम् ।

यद्वा भुवनसंस्थानं तद्धि व्योम निराकृति ।। ८

सति वाऽसति वा देहे

निर्दुःखसुखत्वमक्षयं मोक्षः ।

बुद्धेऽमले स्वभावे

निर्भरविश्रान्तिरस्तु सर्वेह ।। ९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्रकरणे उ० जगदसत्ताप्रतिपादनं नाम चतुरधिकशततमः

सर्गः ।। १०४।।